# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

# रामकृष्णमिशन्–विवेकानन्द–शैक्षणिक–शोधसंस्थानम्, बेलुड़मठः

उद्घाटकः - स्वामी शास्त्रविद्यानन्द

निर्देशकः - डः श्रीवेङ्कटरमणभट्टः, प्राध्यापकः, संस्कृताध्ययनविभागः

सम्पादकः - श्रीउत्तमघोषः,स्नातकोत्तरद्वितीयवर्षीयः

आलङ्कारिकौ- सोमनाथवर्मणनारायणदासौ, स्नातकतृतीयवर्षीयौ

विषयः - सूर्यभगवान्     वर्षम्– ६,     अङ्कः–१६

प्रकाशनदिनाङ्कः – २८.०१.२०२० ,वासरः – मंगलवासरः

ॐ

## ॥आदित्योपासना॥

**स्नातकतृतीयवर्षीयः,देवकुमारपूजारी**

**जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।**
**तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥**

जगदात्मने नमः। कोऽसौ? सूर्यः। ननु भोः किमत्र मानम्। सूर्य आत्मा जगतस्तस्थुषश्च (अथर्ववेदे १३.२.३५) इति श्रुतिरिति वदामः। कोऽयं नमस्कारः? उपासना इति वदामः। किं तेन? चित्तशुद्धिः। चित्तशुद्धिरेव उपासनाफलमिति शृण्मः। तत्र उपासना नाम सगुणब्रह्म–विषयमानसव्यापाररूपा इति। ननु तर्हि सूर्योपासना किंरूपेयम्। अत्र च सूर्यविषयमानसव्यापाररूपा उपासना उच्यते। भारतीयवैदिकपरम्परायां सूर्यः प्रत्यक्षदेवतारूपेण पूज्यते।

उपासनायाः कृते सूर्यस्य स्वरूपं चिन्त्यते। तच्च योगिभिः उच्यते यत् रक्तपद्मासनस्थः, सर्वगुणसागरः, सर्वस्य जगतः अधिपतिः, किरीटे च पद्मरागमणिः यस्य, रक्तवर्णदेही, चतुर्भुजः, त्रिनेत्रः च वर्तते तमादित्यं वयं भजामः। उक्तञ्च-

**रक्ताम्बुजासनमशेषगुणैकसिन्धुं**
**भानुं समस्तजगतामधिपं भजामि।**
**पद्मद्वयाभयवरान् दधतं**
**कराब्जैर्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्॥ इति।**

वैदिककाले आदित्योपासना तथा नासीत् यथा इन्द्राग्न्यादीनामासीत्। परन्तु वेदे आदित्योपासनाया विषये बहुत्र वर्तन्ते मन्त्राः। तत्र च वेदे गायत्रीमन्त्रे सूर्यस्यैव महिमा प्रकाशितः। तत्र तस्य मन्त्रस्य व्याख्यानकाले सायणाचार्यः वदति यत् यः सविता देवः

अस्माकं सर्वेषां संसारिणां कर्माणि कर्मादिविषया बुद्धीर्वा प्रेरयेत् (तस्य) सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य सर्वैरुपास्यतया ज्ञेयतया च सम्भजनीयम् अविद्यातत्कार्ययोः भर्जनात् भर्गः स्वयं ज्योतिः परब्रह्मात्मकं तेजः वयं ध्यायामः इति। अत्र सूर्यः परब्रह्मरूपेण कल्प्यते। मन्त्रस्तावत्-

**ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यम्।**
**भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ इति।**

वेदे तस्य प्रणाममन्त्रः अपि वर्तते। तच्च -

**आ कृष्णेन रजसा वर्तमानो निवेशायन्नमृतं मर्त्यञ्च।**
**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**

न केवलं सूर्यस्य वेदे पुराणे च उपासनापद्धतिः वर्तते, अपि तु रामायणादिषु काव्येऽपि तस्य उपासनाविषये विधिः फलञ्च लभ्यते। यदा रामः रावणेन साकं युद्धं कुर्वन् आसीत् तदा ऋषिः अगस्त्यः युद्धभूमौ रामसमीपमागत्य सनातनं गुह्यं स्तोत्रं प्रोक्तवान् येन रामः बलवान् भूत्वा विजयमवाप्नोत्। तच्च आसीत् आदित्यहृदयस्तोत्रम्। अत्र सूर्यस्यैव महिमा वर्णितः। तत्र सूर्यः भगवान् सर्वदेवतानां स्वरूपं वर्तते। सूर्यः सर्वभूतेषु अन्तर्यामिरूपेण तिष्ठति। एवम्प्रकारेण सूर्यः सर्वशक्त्याधारः, परब्रह्मस्वरूपः इति च प्रतिपादितवान्।

आदित्योपासनायाः फलं तत्र उक्तं यत् आयुर्वृद्धिः भवति। किञ्च, मनुष्याणां पापानि चिन्ताः च अपगच्छन्ति। उक्तं च-

**आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।**

**जयावहं जपेन्नित्यमक्षयं परमं शिवम्॥**

**सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।**

**चिन्ताशोकप्रशमनम् आयुर्वर्धनमुत्तमम्॥ इति।**

एवमेव सूर्यशतकस्य प्रणेतुः मयूरस्य कुष्ठरोगोपशमनं जातं सूर्योपासनायाः। सूर्योपासना परब्रह्मोपासना एव इति शिवम्॥

## ॥सूर्यमन्दिराणि॥

**स्नातकद्वितीयवर्षीयः, दिवाकरचक्रवर्ती**

सूर्यः पुराणेषु लोककथासु च प्रसिद्धो देवः। अयं देवः आरोग्यकारकः, तथाहि उच्यते आरोग्यं भास्कराद् इच्छेत् इति। सूर्यदेवः ग्रहचक्रस्यापि अधिपतिः। अस्य देवस्य भक्ताः समग्रजगति विद्यन्ते। हिन्दूनां प्रसिद्ध-तन्त्रेषु सौरतन्त्रम् अन्यतमम्। अद्यापि पञ्चायतनपूजायां सूर्यदेवः मध्यमणित्वेन विराजते। प्रतिदिनं सर्वे ब्राह्मणाः प्रातः मध्याह्ने सायङ्काले सूर्यदेवम् अर्चन्ति। तस्य सूर्यदेवस्य मन्दिराणि भारते प्रतिकोणं भवेयुरित्यत्र किम् आश्चर्यम्। भरतवर्षस्य विशिष्टानां केषाञ्चन सूर्यमन्दिराणां विषये आलोच्यते।

### कोणार्कसूर्यमन्दिरम्--

पुरुषोत्तमक्षेत्रस्य समीपे चन्द्रभागानद्याः तटे समुद्रात् नातिदूरे इदं मन्दिरं विराजते। श्रूयते यत् कलिङ्गराजेन गङ्गावंशीयेन नरसिंहदेवेन इदं मन्दिरं निर्मापितम्। अस्य राज्ञः कालः १२९४ विक्रमाब्दात् १३२१ विक्रमाब्दं यावत् विनिश्चितो वर्तते। इदं मन्दिरं भारतीयस्थापत्यस्य श्रेष्ठनिदर्शनेषु अन्यतमम्। मन्दिरं रथाकारं वर्तते। सूर्यदेवस्य भव्यो विग्रहो गर्भमन्दिरे राराजते। एवं श्रूयते यत् मन्दिरस्य शिखरप्रदेशे कश्चन बृहदाकारो मणिरासीत् येन मन्दिरं सुस्थितमासीत्। तेन समुद्रस्थानां पोतानां दिग्भ्रमो भवति इति

कारणेन ब्रिटिश्-सर्वकारेण मौर्ख्यवशात् स मणिः मन्दिरात् निष्काशितः। तेन मन्दिरं ध्वस्तम्। ध्वंसावशेषभूतम् अपि इदं मन्दिरम् अद्यत्वे अपि समग्रजगतो जनान् आकर्षति।

मन्दिरं परितः प्राकारो वर्तते। २६४ मीटर् दीर्घं १६४ मीटर् प्रशस्तं स्थानं मन्दिरपरिसरस्य। प्राकारे त्रीणि द्वाराणि सन्ति।

## मोटेरास्थं सूर्यमन्दिरम्

गुजरातराज्यस्य कर्णावतीनगरात् शतकिलोमिटर् दूरे मेहसनामण्डलस्य मोटेराग्रामे स्थितम् आदित्य-मन्दिरं जगति प्रसिद्धम् अस्ति। मन्दिरम् इदं १०८३ वैक्रमाब्दे सोलङ्किराजेन प्रथमभीमेन निर्मापितम् आसीत्। मन्दिरस्य निर्माणं सोलङ्किस्थापत्यप्रकारेण कृतम्। मन्दिरस्य त्रयः अंशाः सन्ति। गूढमण्डपसभामण्डपयोर्मध्ये रिक्तं स्थानं विद्यते। एकम् अपरस्मात् पूर्णतया भिन्नतया परिकल्पितम् अस्ति। गूढमण्डपस्य तिसृषु दिक्षु गवाक्षाः सन्ति। गूढमण्डपस्य अङ्गत्वेन एव गर्भगृहं परितः प्रदक्षिणमार्गो विद्यते। अस्य शिखरः सम्प्रति नष्टो जातः। गर्भगृहं च चतुरस्रम्। ११ फिट्- परिमितं तस्य दैर्घ्यम्। गर्भगृहे यस्यां वेद्यां भगवतो विग्रह आसीत्, सा वेदिः सम्प्रति ध्वस्ता। गर्भगृहस्य अन्तर्भित्तयः सामान्याः। परन्तु बहिर्भित्तिषु विविधभास्कर्याणि चित्राणि च उत्कीर्णानि सन्ति। भगवतः सूर्यस्य विविधविग्रहाः शिवविष्णुब्रह्मादीनां देवानां विग्रहाः च अलङ्कुर्वन्ति गर्भमण्डपस्य भित्तीः।

## कुम्भकोणस्थं सूर्यनारायणमन्दिरम्--

अधुनातनस्य तामिडनाडुराज्यस्य प्रसिद्धं शैवक्षेत्रं कुम्भघोणः। कुम्भकोणे विद्यमानेषु प्रसिद्धदेवालयेषु सूर्य-नारायणदेवालयो मुख्यः। अस्य तत्क्षेत्रीयं नाम सूर्यनार्कोविल् इति। स्थलपुराणानुसारमत्र कवलमुनिः कुष्ठरोगेण पीडितः सन् नवग्रहान् तपसा तोषयितुं प्रायतत। किन्तु उग्रतपसा तोष्यमाणैरपि ग्रहैः तस्य उद्धारो न कृतः, एतद् दृष्ट्वा कुपितो ब्रह्मा नवभ्यो

ग्रहेभ्यः कुष्ठग्रस्ततायाः शापं प्रदत्तवान्। शापग्रस्ताः ग्रहाः वेल्लरुवक्कवने पतिताः। ते शापमोचनाय शिवं प्रार्थयामासुः। शिवेन अनुगृहीताः ग्रहाः तत्रैव मनुष्याकारं प्राप्य वसन्ति। केवलम् अस्मिन् क्षेत्रे एव प्रतिगृहं भिन्नानि मन्दिराणि सन्ति।

## उनावस्थं सूर्यमन्दिरम्-

साम्प्रतिकस्य मध्यप्रदेशराज्यस्य दतियामण्डलस्य उनावनामिकायां लध्व्यां नगर्याम् अवस्थिते बालाजिमन्दिरे अयं बालाजिनाम्ना बहूनां देवानां प्रसिद्धो वर्तते। भगवतः श्रीवेङ्कटेश्वरस्य बालाजि इति नामान्तरं वर्तते। राजस्थानप्रदेशे बालाजिनाम्ना भगवान् आञ्जनेयः प्रसिद्धो वर्तते। एवम् उनावक्षेत्रे भगवान् मरीचिमाली एव बालाजिनाम्ना प्रसिद्धः अस्ति। मध्यप्रदेशस्य प्रसिद्धेषु देवालयेषु बालाजिमन्दिरम् अतीव प्रसिद्धम्। दतियामण्डलम् आध्यात्मिकं क्षेत्रम्। दतियायां भगवत्याः धूमावत्याः पीठं प्रसिद्धम्। दतियामण्डलस्थे उनावनगरे बलाजिमन्दिरं वर्तते। बहोः कालात् पूर्वं दतियाराजेन भगवतो मरीचिमालीनो मन्दिरं निर्मितमासीत् इति श्रूयते।

## काश्मीरस्थं मार्तण्डमन्दिरम्-

कर्कोटकवंशीयेन ललितादित्यमुक्तपीडेन क्रैस्तीये अष्टमे शतके निर्मितं मार्तण्डमन्दिरम्। क्रैस्तीये पञ्चदशशतके महम्मदीयशासकेन सिकन्दरबुतशिकेन पूर्णतया भञ्जितम्। एतन्मन्दिरं यस्मिन् शिखरे निर्मितं ततः समग्रं काश्मीरं द्रष्टुं शक्यते। मन्दिरस्य स्थापत्ये गान्धार-गुप्त-चैनिक-रोमन्-यवनादीनां समेषां स्थापत्यकलायाः मिश्रणं दृश्यते। मन्दिरचत्वरे चतुरशीतिः लघुमन्दिराणि आसन्। एषु मन्दिरेषु गङ्गा यमुना विष्णु इत्यादीनां पूजा प्रचलति स्म। भारतीयप्रत्नतत्त्वविभागेनेदं मन्दिरं राष्ट्रियस्मारकत्वेन उद्घोषितम्।

**राञ्चीनगरस्थं सूर्यमन्दिरम्-**

इदं मन्दिरं साम्प्रतिके काले निर्मितम्। विहार-झारखण्डप्रदेशयोः मुख्यः उत्सवः छट्-पूजा। अस्मिन् उत्सवे जनाः भगवन्तं सूर्यं पूजयन्ति। राञ्ची-नगरे छट्-व्रतीनां स्नानाय खनितस्य मुख्यकेदारस्य पार्श्वे एव साम्प्रतिके काले इदं मन्दिरं विनिर्मितम्। मन्दिरं रथाकारं वर्तते। अष्टादशचक्रविशिष्टं रथं सप्ताश्वा वहन्ति। अन्तः भगवतः सूर्यदेवस्य भव्यो विग्रहः शोभते। राञ्चीनगरे मुख्यतया द्रष्टव्येषु स्थानेषु इदं सूर्यस्थानं प्रसिद्धं वर्तते।

एतानि विहाय गयाक्षेत्रे बुद्धगयाक्षेत्रे आन्ध्रप्रदेशस्य श्रीकाकुलमण्डलस्य अरसवल्लिस्थाने राजस्थानस्य रैनकपुरे अन्येषु च बहुषु स्थानेषु प्रसिद्धानि सूर्यमन्दिराणि सन्ति।

## ॥सूर्याधारेण कालनिर्णयः॥

**स्नातकतृतीयवर्षीयः,सौरभपोडेलः**

**आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।**
**दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते।**

षट्सु वेदाङ्गेषु चक्षुस्समानं ज्यौतिषम् अन्यतमम्। शास्त्रमिदं कालविज्ञापकम्। मुहूर्तं शोधयित्वा क्रियमाणा यज्ञादिक्रियाविशेषाः इष्टफलाय कल्प्यन्ते, नान्यथा। तन्मुहूर्तज्ञानञ्च ज्यौतिषायत्तम्, अतोऽस्य ज्यौतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम्। तदुक्तं-

**“वेदा हि यज्ञार्थमभिप्रवृत्ताः**
**कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं**
**यो ज्यौतिषं वेद स वेद यज्ञान्॥”इति।**

ज्यौतिषानुसारं कालनिर्णयस्य द्वे वत्मनी वर्तेते, ते सौरमानं चान्द्रमानञ्चेति। सूर्यसम्बद्धं मानं सौरमानं चन्द्रसम्बद्धं च मानं चान्द्रमानम् इति। सौरमानंञ्च द्वादश राशिचक्रं ज्यौतिश्चक्रं

वा आश्रित्य गण्यते। मेषः, वृषः, मिथुनम्, कर्काटकः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनश्चेति क्रमशः द्वादश राशयः। राशीनां नामानि अनुसृत्यैव सौरमाने मासानां नामकरणं भवति। सूर्यो मेषराशिमारभ्य अप्रदक्षिणं(anticlockwise) यं राशिं प्रविशति तां राशिमाश्रित्य तस्य मासस्य नाम भवति। मेषराशेः वृषराशिं यदा सूर्यः प्रविशति तदा सः मासः वृषमासः ततो वृषराशेः यदा मिथुनराशिं प्रविशति सः मासः मिथुनमासः एवं क्रमशः कर्काटकमासः, सिंहमासः, कन्यामासः, तुलामासः, वृश्चिकमासः, धनुर्मासः, मकरमासः, कुम्भमासः, मीनमासश्चेति एवं नामभिः मासाः अभिधीयन्ते। एते एव सौरमानस्य द्वादश मासाः। मिथुनराशितः यदा सूर्यः कर्काटकराशिं प्रविशति तदा कर्काटकसंक्रान्तिः भवति तच्च दक्षिणायनमिति कथ्यते। यदा च सूर्यः धनूराशितो मकरराशिं प्रविशति तदा मकरसंक्रान्तिः भवति तच्च उत्तरायणमिति कथ्यते। अत्र द्वादशसु मासेषु कस्मिन् कति दिवसाः इति निश्चयो नास्ति परन्तु प्रति मासं प्रायः त्रिंशत् एकत्रिंशत् वा दिनानि तिष्ठन्ति अपि च साकल्येन पञ्चषष्ट्यधिकत्रिशतं दिनानि तिष्ठन्ति। एषः समयः सम्पूर्णस्य खस्य एकवारं परिभ्रमणाय सूर्यस्य आवश्यकः। एतेन पञ्चषष्ट्यधिकत्रिशतपरिमितेन कालेन एको वत्सरो भवति। ततः पुनः सूर्यो यदा मीनराशितः मेषराशिं प्रति गच्छति तदा नवीनो वत्सर आरभ्यते। ज्यौतिषे कालपरिगणनस्य सौकर्यार्थं भूकेन्द्रपद्धतिः स्वीकृता। अस्यां पद्धतौ पृथ्वीं स्थिरीभूतां मत्वा सूर्यः पृथ्वीं परितः परिभ्रमति इति स्वीक्रियते। वस्तुतस्तु सूर्य एव स्थिरः पृथ्वी सूर्यं परितः परिभ्रमन्ती भवति इति निश्चयः इति शिवम्।

## ॥सूर्यस्य प्रभावः॥

**स्नातकतृतीयवर्षीयः, कार्तिकरुइदासः**

अस्मिन् सौरजगति दृश्यादृश्यमानेषु बहुषु नक्षेत्रेषु सूर्यः प्रधानः मूलभूत इति सर्वैः स्वीक्रियते। यथा अस्मिन् शरीरे आत्मैव प्रधानः, तम् आधारीकृत्य सर्वाणि इन्द्रियादीनि प्रवर्तन्ते, तथा सूर्यं परितः सर्वे ग्रहाः आवर्तन्ते । तस्मात् " सूर्यः आत्मा जगतः " इत्युक्तं ऋग्वेदीयसूर्यसूक्ते । अपि च सकलशक्तेः आधारभूतो भवति सूर्यः । अधुना सूर्यस्यास्य प्रभावविषये आलोच्यते ।

### लोके अस्य प्रभावः

सूर्यस्य प्रभावः समग्रसृष्टीनां मानवानां पशूनां वनस्पतीनां समुद्रादीनामुपरि वर्तते इत्यत्र नास्ति शङ्कालेशोऽपि । तस्य परिभ्रमणेनैव मानवीयं जीवनम्, वर्षमानम्, अयनम्, ऋतवः, मासाः, पक्षाः, अहोरात्रम्, तिथिः, मुहूर्तः, होरा-इत्यादिकं संभवति । सूर्यं विना मानवजीवनस्य कल्पना अपि अशक्या एव। यदि सूर्यः न अभविष्यत् तर्हि वृक्षाः एव न अभविष्यन्, यतो हि वृक्षाः सूर्यकिरणप्रभावात् एव " सालोकसंश्लेष " इति प्रक्रियां सम्पादयन्ति । तेनैव तेषां वर्धनप्रक्रिया प्रचलति। अपि च सूर्यप्रभावात् एव ऋतुचक्रं प्रवर्तते । ग्रीष्मकाले प्रखरसूर्यकिरणेन जलानि वाष्परूपेण उपरि गच्छन्ति पुनः वर्षाकाले घनीभूय वृष्टिरूपेण अधः पतन्ति। एवम्विधकार्याणि सूर्यद्वारा एव संभवन्ति । यदि सूर्यः न अभविष्यत् तर्हि पृथिवी तुषारभूमिरेवाभविष्यत् । सूर्यस्य किरणाः आरोग्यवर्धकाः भवन्ति। सूर्यकिरणात् " vitamin D" लभ्यते । तदस्माकं उपकाराय एव भवति । न केवलम् तावद् अपि तु दिङ्निर्णये अपि सूर्यमेवाश्रयन्ति स्म प्राचीनकाले। सूर्यशक्तिः अनन्ता इति कथ्यते ।

तस्मात् इदानीन्तनकाले तां सौरशक्तिम् उपयुज्य बहूनि यन्त्राणि निर्मीयन्ते । तद्यथा " solar heater " , " solar cooker "," solar light " प्रभृतीनि। अस्य शक्तेः धारणार्थं " solar cell " इति नामधेयं यन्त्रं निर्मितम् । एवं नानाविधेषु स्थलेषु अस्य प्रभावः दृश्यते ।

## आध्यात्मिकजगति अस्य प्रभावः

आध्यात्मिकक्षेत्रे सूर्यस्य स्थानं बहुधा दरीदृश्यते। सर्वे एनं भगवद्रूपेण पूजयन्ति । वैदिककालात् पश्चात् भारते चत्वारः धार्मिकसम्प्रदायाः आसन् तद्यथा- शैवः , वैष्णवः , सौरः , शाक्तः इति । एतस्मात् ज्ञायते सूर्यस्य आध्यात्मिकदृष्ट्या अपि प्रभावः अस्ति । वैदिकदेवतारूपेण अपि सूर्यस्य प्रसिद्धिः प्राप्यते । परन्तु तदा एषः गौणरूपेण आसीत् । सूर्यस्य विषये एका कथा प्राप्यते । मयूरभट्टनामा कश्चिद् पुराकविः आसीत् । तस्य " कुष्ठः " इति रोगः अभवत् । तदा सः सूर्यस्य उपासनां कृतवान् , अपि च सूर्यवरेण पुनः स्वस्थः जातः। ततः तेन " सूर्यशतकम् " इति स्तुतिः विरचिता। सूर्यः प्रत्यक्षदेवः इत्यपि कथ्यते । अधुनाऽपि सर्वे स्नानं कृत्वा सुर्यप्रणामं कुर्वन्ति। भारतवर्षं विहाय अपि ग्रीक्प्रदेशे सूर्यस्य आध्यात्मिकप्रभावः आसीत् । तत्र ग्रीक्पौराणिकगाथानुसारं सूर्यः Phoebs Apollo अपि च Helios इति नाम्ना प्रसिद्धः आसीत् । प्राचीनकाले ग्रीकजनानां कस्यापि चर्मरोगः भवति चेत् सर्वे चिन्तयन्ति यत् अनेन सूर्यस्य अवमानना कृता, अतः सूर्यरोषाद् अयं रोगो जात इति। अपि च ते एवं चिन्तयन्ति यत् यस्मात् सूर्यः अस्य रोगस्य प्रदाता तस्मात् सूर्यः एव अस्य निरासं कर्तुं योग्यः। तस्मात् ते सूर्यस्य उपासनां कुर्वन्ति स्म ।

न केवलं लोके आध्यात्मिकजगति अपि तु शास्त्रे अस्य प्रभावः दृश्यते । सूर्यम् आधारीकृत्य ज्योतिषशास्त्रस्य सुप्रसिद्धो ग्रन्थः उपलभ्यते तद्यथा " सूर्यसिद्धान्तः" इति। एवं शास्त्रदृष्ट्या अपि सूर्यस्य प्रभावः न सामान्यः।

## ॥सूर्यग्रहणम्॥

**स्नातकद्वितीयवर्षीयः, शुभमलायेकः**

आकाशे दृग्गोचरीभूतासु घटनासु सर्वतोऽभ्यधिकं विस्मयाधायकं कुतूहलोत्पादकं च रविचन्द्रयोर्ग्रहणमेव। क्वचिच्च इदमेव प्रतीयते भयावहम्। ननु किमिदं ग्रहणमिति चेत् सामान्यतः वक्तुं शक्यते यत् अकस्मादेव किञ्चित्कालं सूर्यस्य चन्द्रस्य वा अदर्शनमेव सूर्यग्रहणं चन्द्रग्रहणम् इत्यभिधीयते। सकृच्चिन्तय यदि अस्माकं सूर्यः हठादेव आकाशाल्लुप्येत तर्हि किं स्यात? वयं सर्वे प्राणिनः साक्षाद्विनाशमेव प्राप्नुमः, यतो हि भुवि जीवानां प्रसविता सवितैव विद्यते। अत एव सूर्यग्रहणसमये यदा तमः सूर्यम् व्याप्नोति तदा रविः लोपं गतः रात्रिश्च समागता इति चिन्तयन्तः जनाः आतङ्किताः सन्तः इदमेव विचारयितुम् आरभन्ते यत् प्रलयकालः समागतः इति। वैदिककाले पूर्णं सूर्यग्रहणं समवलोक्य जनाः किमन्वभूवन्? किम् वा अस्य कारणत्वेन निर्दिष्टवन्तः? इदम् अस्माद् ऋग्वेदीयमन्त्रे समवलोकनीयम्-

**"यत् त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः।**
**अक्षेत्रविद्यया मुग्धो भुवनान्यादीधयुः॥**
**स्वर्भानोरध यविन्द्र माया अवो दिवो वर्तमाना अवाहन्।**
**गूल्हं सूर्यं तमसाऽपव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः॥"इति।**

एतेन स्पष्टीभवति यद् वैदिककाले इदम् अवबुध्यते स्म यद् ग्रहणस्य कारणं सूर्याचन्द्रमसोस्तमसाच्छादनमेव। इदं तमश्च तयोरुपरि राहुनामकोऽसुरो निक्षिपति, तेन अनयोः प्रकाशो विनाशमुपयाति। तदा तौ संसारस्य प्रकाशसमर्पणात्मकं स्वकार्यं विधातुमक्षमौ भवतः।

ग्रहणस्य प्रयोजनम् अत्र त्रिधा निरूप्यते। प्रथमं धार्मिकं, द्वितीयं लोकेषु चमत्कृतिः,

तृतीयं च रविचन्द्रबिम्बयोः भौतिकं रासायनिकं च गवेषणम्।

सूर्यग्रहणसमये बहूनि पूजादिकार्याणि आचर्यन्ते, इदं भवति प्रथमं प्रयोजनम्। पूर्वत एव ज्योतिर्विन्निर्दिष्टसमयानुसारेण ग्रहणं लोकेषु चमत्काराधायकं भवति, इदमेव द्वितीयं प्रयोजनम्। सूर्यस्य पूर्णग्रहणकाल एव वैज्ञानिकैः सूर्यप्रभूतानां ज्वालानां रश्मीनां च त्रिपार्श्व-काचकैः रक्तपीतादिसप्तवर्णमण्डलस्य तत्प्रभवद्रव्यस्य चाविष्कृतिः विहिता इदञ्च तृतीयं प्रयोजनम् ।

इदानीं कथं सूर्यग्रहणं भवति इति आलोच्यते। तथाहि पृथिव्याः चन्द्रमसोश्च परिभ्रमणकारणात् यदा सूर्यः चन्द्रः पृथिवी च एकस्यामेव रेखायाम् अवतिष्ठन्ते किञ्च सूर्यपृथिव्योः अन्तराले चन्द्रः आगच्छति तदा सूर्यस्य प्रकाशः पृथिव्यां न पतति। सूर्यः चन्द्रमसा आच्छादितो भवति मेघेन इव। तदा एव सूर्यग्रहणं जायते। इदं च ग्रहणं द्विविधं भवति। पूर्णग्रासं खण्डग्रासं च। एवं यस्मिन् समये सम्पूर्णरविः चन्द्रेण आच्छादितो भवति तदा पूर्णसूर्यग्रहणम्। यदा च चन्द्रबिम्बस्य कतिपयांशैः रविबिम्बस्य स्वल्प एव अंशः आच्छादितो भवति तदा खण्डग्रहणं भवति। यदा च अमान्तकाले ग्रहणसमये चन्द्रबिम्बः रविबिम्बतः लघीयान् भवति तदा पूर्णग्राससमये रविबिम्बस्य मध्यभागः चन्द्रेण आच्छादितो भवति, अवशिष्टभागश्च कङ्कणाकृतिवत्प्रकाशं लभते। एतादृशग्रहणं कङ्कणग्रहणमिति व्यपदिश्यते। एवञ्च पृथिवीतः चन्द्रस्य अवस्थानानुसारं भूपृष्ठे भिन्नभिन्नस्थानेभ्यः भिन्नं भिन्नं ग्रहणं दृश्यते। यदा काश्यां पूर्णग्रहणं भवति तदा माद्रासप्रदेशे खण्डग्रहणं भवति। तस्मिन्नेव समये अस्ट्रेलिया प्रदेशे ग्रहणं नैव दृश्यते।

एवञ्च भुवि सूर्यग्रहणं कदा कथं दृश्येत इत्येत् सर्वं गणितद्वारा पूर्वतः एव निर्धारयितुं शक्यते। सूर्यग्रहणस्य प्रथमत उल्लेखः ऋग्वेदे विद्यते। ऋग्वेदकालादेव भारतीयाः

सूर्यग्रहणगणितं कर्तुं नितरां प्रौढाः आसन्नेव इति दिक्।

***

## ॥सम्पादकीयम्॥

**नमः सवित्रे जगदेकचक्षुषे**

**जगत्प्रसूतिस्थितिनाश हेतवे ।**

**त्रयीमयाय त्रिगुणात्मधारिणे**

**विरञ्चि नारायण शंकरात्मने ॥**

यथा अस्माकं शरीरे आत्मैव प्रधानः तथा सौरजगति सूर्य एव प्रधानः। सूर्यं परित एव सर्वे ग्रहाः अहर्निशं परिभ्रमन्ति। अत आम्नातं ऋग्वेदीयसूक्ते "सूर्यः आत्मा जगतः" इति। सूर्यप्रकाशमाश्रित्य एव जगति सर्वाण्यपि वस्तूनि प्रकाशन्ते, अतोऽयं जगच्चक्षुरित्युच्यते। गायत्रीमन्त्रे अस्यैव सवितुः प्रशंसनं गीयते। सूर्यगतिमाश्रित्य कालनिर्णयो भवति। सौरमाणे द्वादशमासानां नामानि राशीनां नामानुसारेणैव भवन्ति। सूर्यो मेषराशिमारभ्य यं राशिं प्रविशति तं राशिमाश्रित्य तस्य मासस्य नाम भवति। मिथुनराशितः यदा सूर्यः कर्काटकराशिं प्रविशति तदा कर्काटकसंक्रान्तिः भवति तच्च दक्षिणायनमिति कथ्यते। यदा च सूर्यः धनुर्राशितो मकरराशिं प्रविशति तदा मकरसंक्रान्तिः भवति तच्च उत्तरायणमिति कथ्यते। न केवलमेतत् आरोग्यं भास्करादिच्छेदिति वचनात् सूर्योऽस्माकम् आरोग्यप्रदाता। सूर्यशतकस्य प्रणेतुः मयूरस्य कुष्ठरोगोपशमनं सूर्योपासनया एव जातम्। सूर्यकिरणेनैव बहवः रोगाः प्रशमिता भवन्ति। अत एव सूर्यग्रहणसमये बहूनां रोगदकीटानां वृद्धिर्भवतीति विपश्चिदपश्चिमाः। सूर्यः अखिलप्राणिनां बलप्रदः, अत एव रावणेन सह युद्धसमये रामः अगस्त्यमुनेः आदित्यहृदयस्तोत्रं श्रुत्वा प्रभूतबलं प्राप्तवान्। एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य कुण्डलमाखण्डलदिशः दीपको

ब्रह्माण्डभाण्डस्य प्रेयान् पुण्डरीकपटलस्य शोकविमोकः कोकलोकस्य अवलम्बो रोलम्बकदम्बस्य सूत्रधारः सर्वव्यवहारस्य इनश्च दिनस्य इति अम्बिकादत्तवचनं संस्मृत्य तस्मादेव आदित्यभगवतः सर्वेषाम् आरोग्यं कामयमानो विरमामि विस्तरात्।

***